National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 216-218
© 2025 NJHSR
www.sanskritarticle.com

**अङ्किता जायसवाल**
अनुसन्धात्री,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-
विद्यालयः, नवदेहली – 110016

**Correspondence:**
**अङ्किता जायसवाल**
अनुसन्धात्री,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-
विद्यालयः, नवदेहली – 110016

# केनोपनिषदः समाजोपयोगिता

**अङ्किता जायसवाल**

सर्वदेशेषु सर्वकालेषु कोऽहमिति प्रश्नमनुसन्धाय मनुष्यः सर्वक्षेत्रेषु आत्मनः तत्त्वमन्वेषयति। यथा समाजे मम स्थानं कीदृशमिति सामाजिकस्तरे, राज्यपालने मम स्थानं कीदृशमिति राजकीयस्तरे, तथा मनसि अनुभूयमानं ज्ञानं कीदृशमिति मनोवैज्ञानिकस्तरे, तथैव यो देवः सविताऽस्माकं धियः धर्मादिगोचराश्च प्रेरयति तेन सह कः सम्बन्धः इति आध्यात्मिकस्तरे जिज्ञासमानः वर्तते।

ज्ञानविषयिणी चर्चा प्रायः भारतीय दर्शनेषु सर्वेष्वपि दृश्यते। मनसः स्वरूपं किमिति उपनिषत्सु महती चर्चा यद्यपि वर्तते तथापि दार्शनिकेषु बहवः विप्रतिपत्तयः, यथा मनः जडं उताहो चेतनं, सावयवम् उताहो निरवयवम् इत्येवम्।

इन्द्रियजन्यं ज्ञानं प्रत्यक्षं सर्वेषामप्यनुभवसिध्दम्। इन्द्रियजन्यज्ञानेऽपि इन्द्रियाणां दोषवशात् वस्तुस्वरूपज्ञानं न भवतीति लोके दृष्टम्। शुक्तिरजतस्थलेऽपि शुक्तौ रजतज्ञानं भ्रमात्मकं जायते। पुनः भ्रमापगमे शुक्तेः स्वरूपज्ञानं यदा भवति तदा रजतज्ञानस्य बाधः इति व्यवह्रियते। अनेन अबाधितत्वं यथार्थज्ञानत्वम् इति सिद्ध्यति। अतः अनधिगत-अबाधित-विषयज्ञानमेव स्वरूपज्ञानमिति परिभाष्यते। तस्यैव प्रमा इति नामान्तरम्।

प्रमायाः आश्रयः प्रमाता, विषयः प्रमेयः, प्रमायाः करणं प्रमाणमिति त्रिपुटी सर्वैरङ्गीक्रियते। प्रमेयनिरूपणं प्रमाणाधीनमेव। प्रत्यक्षज्ञानस्य करणानि इन्द्रियाणि। प्रत्यक्षस्य अनुगामीनि एव अनुमानम्, उपमानम् इत्यादीनि। शब्दस्तु आप्तवाक्यत्वेन प्रमाणम्। अद्वैतसिध्दान्ते सर्वस्य ज्ञेयप्रपञ्चस्य मिथ्यात्वं प्रतिपाद्यते इत्यतः लौकिकप्रमाणैः जन्यं ज्ञानं बाधितं भवति। अतः आत्मज्ञानप्राग्दशायामेव अयं सर्वोऽपि लोकव्यबहारः। एवमुक्तम् एलानानाद देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः। लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात्।। इति। ब्रह्मज्ञानातिरिक्तेन केनापि ज्ञानेन व्यावहारिकप्रपञ्चस्य बाधः न भवति। ब्रह्मसाक्षात्कारपर्यन्तमेव प्रमाणानां प्रवृत्तिः, अत ऊर्ध्वं प्रमाणं, प्रमाता, प्रमेयम् इति भेदो निवर्तते। यथा श्रुतिः 'यत्र वा अस्य सर्वमात्मैवाभूत् तत्केन किं जिघ्रत्केन के पश्येत्' इत्यादिना सर्वेषां विषयाणां बाधितत्वं वदति। घटादिविषयाणां व्यवहारदशायमेव अबाधितत्वं, अतः प्रमाणानामपि व्यवहारदशायामेव प्रवृत्तिः। लोकव्यवहारार्थं प्रमाणानि अङ्गीकृतानि।

प्रमाणानां विषये दार्शनिकेषु मतभेदः। चार्वाकाः प्रत्यक्षमेव प्रमाणं मन्यन्ते, बौध्दाः प्रत्यक्षानुमाने, योगिनः प्रत्यक्षानुमानागमान्, तार्किकाः उपमानसहितानि चत्वरि, मीमांसकाः पञ्चमं प्रमाणम् अर्थापत्तिं, तत्रैव भाट्टाः षष्ठं प्रमाणम् अनुपलब्धिं च अङ्गीकुर्वन्ति। व्यवहारे भाट्टनयः इति वेदान्तिनां मतमित्यतः व्यावहारिकज्ञानविषये षट् प्रमाणानि अङ्गीकुर्वन्ति वेदान्तिनः।

उपनिषत्सु ज्ञानशब्देन ब्रह्मैव अभिप्रेतम्। यदि लौकिकप्रमाणानि तत्र न प्रवर्तेरन् तर्हि ब्रह्मविषये किं प्रमाणम् ? प्रमाणाभावे च ब्रह्मास्तीति कथं वक्तुं शक्यते? यदि प्रमाणैः ज्ञातुं शक्यते तर्हि ब्रह्मणः प्रमेयत्वं स्यात्। लौकिकज्ञानापेक्षया ब्रह्मज्ञानस्य वैलक्षण्यं कीदृशम् इत्यत्र श्रुतिः 'यत् साक्षात् अपरोक्षात् ब्रह्म'

इत्येवं ब्रह्म न इन्द्रियप्रत्यक्षम् प्रत्यक्ष नापि परोक्ष अपि तु अपरोक्षमिति प्रतिपादयति।

केवलं ब्रह्मज्ञानस्वरूपविवेचने एव ग्रन्थस्यास्य तात्पर्यमिति कृत्वा, तत्र च शब्द एव प्रमाणमिति च मत्वा ग्रन्थेऽस्मिन् प्रमाणस्वरूपविवेचनं पृथक् न कृतम्। अतः अस्मिन् ग्रन्थे केवलम् उपनिषद्वाक्यानां साहाय्येन ज्ञानस्वरूपमवगन्तुं प्रयत्नः कृतः। वेदान्तशास्त्रे ज्ञानशब्दः ब्रह्मनिर्देशकः। ज्ञानशब्दस्य हि समानार्थवाचकाः विद्या, भूमा, ब्रह्म, आत्मा इति। तद्विरुद्धार्थ-वाचकाः अविद्या, अज्ञानम्, अनात्मा इति। अतः उपनिषत्सु ज्ञानशब्दः तत्पर्यायिशब्दाश्च यत्र यत्र प्रयुक्ताः तेषां सङ्ग्रहणेन अवलोकनेन च उपनिषत्सिद्धान्तः अवगतो भवति। यद्यपि सर्वासु उपनिषत्सु अद्वैतसिद्धान्ते एकवाक्यता प्रदर्शिता भाष्यकारैः तथापि विभिन्नवेदशाखासु ऋषिभिः विभिन्नतया दृष्टत्वेन अद्वैतप्रति-पादनप्रणाली काचित् भिन्ना इव दृश्यते। तत्र प्रयुक्ताः शब्दाः विशिष्टाः दृश्यन्ते। अतः अस्मिन् अध्याये एकैकस्याम् उपनिषदि ज्ञानसंबन्धिवाक्यानि संगृह्य तेषामर्थविवरणम् अद्वैतसिद्धान्ता-नुसारेण करिष्यते। केनोपनिषन्मन्त्राः अतीव स्पष्टतया 'नेदं यदिदमुपासते' इति कार्यब्रह्मणः शुद्धब्रह्मापेक्षया न्यूनत्वं प्रतिपादयन्ति। निषेधमुखेन ब्रह्मस्वरूपं दर्शयन्ति। तथैव बुद्धिवृतीनां स्वरूपं प्रस्तुवन्ति। 'केनेषितं पतति प्रेषितं मनः' इत्यत्र मनसः स्वरूपं विचिकित्सितम्। यद्यपि बुद्धिवृत्तयः ब्रह्मणा प्रचोदिताः तथापि न यथा गुरुः शिष्यान् विषयेषु प्रेषयति, परं तु 'विविक्तनित्यचित्स्वरूपतया तु निमित्तमात्रं प्रवृत्तौ, नित्यचिकित्सा-धिष्ठातृवत्'। राज्ञः भोजनात्पूर्वं चकोरः भोजनपरीक्षायां प्रयोज्यते। यदि विषमिश्रितं भोजनं तस्य वीक्षणमात्रेण पक्षिणः चक्षुः रक्तं भवति। यथा चकोरः सन्निधिमात्रेण राजानं भोजने प्रवर्तयति तथैव आत्मा केवलसन्निधिमात्रेण श्रोत्रादीनि इन्द्रियाणि मनश्च प्रचोदयति। 'मनसो मनो यत्' इत्यनेन मनसः अचेतनत्वं = जडत्वं सूचितम् (वेदान्तिमते मनः जडम्)। "स्वतन्त्रं मनः, स्वविषये स्वयं पतति (प्रवर्तते)" इति पूर्वपक्षः शङ्कराचार्यैः निराकृतः।

श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः'[1] इति मन्त्रेण ज्ञानकरणानां प्रेरकं (सन्निधिमात्रेण) ज्ञानकरणैः अज्ञेयं ब्रह्म इति प्रतिपादितम्। इन्द्रियाणां बहिर्मुखत्वं प्रसिद्धम्। बहिर्मुखत्वेन प्रत्येकं इन्द्रियं स्वविषयव्यञ्जनसमर्थं भवति। तत् स्वविषयव्यञ्जनसामर्थ्यं तु आत्मनः स्वत एव प्राप्यते। यथा उदकस्य औष्ण्यं अग्निसंयोगाद्भवति, तथा चक्षुषः चक्षुस्त्वं, मनसः मनस्त्वं आत्मसंयोगादेव भवति। स तु आगमापायिधर्मः। आत्मनस्तु स्वरूपमेव द्रष्टृत्वं श्रोतृत्वं इत्यतः तेषां उपलब्धिः नित्या। यद् वस्तु इन्द्रियगोचरं तत् जातिगुणादिविशेषणैः युक्त भवति, अतो अन्यस्मै उपदेष्टुं योग्यं भवति। ब्रह्म तु इन्द्रियेभ्यः प्रत्यग्भूतम् इत्यतः 'न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः' इत्युक्तम्।

ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते' (दक्षिणामूर्तिस्तोत्रम्) आत्मा सर्वेषां इन्द्रियजन्यज्ञानानां जनकः। यथा घटोदरस्थितायाः दीपप्रभायाः किरणानि छिद्रेभ्यः बहिः निर्गच्छन्ति तथा ज्ञानं चक्षुरादिकरणद्वारा बहिः स्पन्दते। बहिरेव तेषां इन्द्रियाणां व्यापारः, न तु स्वस्मिन्। अग्निः स्वयमेव स्वप्रकाशकः स्वदाहकः वा न भवति। अन्यदेव तद्विदितादथो अविदितादधि'[2] इति वचनेन ब्रह्म विदिताविदिताभ्यां अन्यत् अर्थात् व्याकृताव्याकृताभ्यम् अन्यत् इति प्रतिपादितम्। विदितं सर्वं प्रपञ्चरूपेण दृश्यमानम्, अविदितं नाम अविद्या अव्याकृतं माया इत्यादिशब्दैः व्यवहृतम्। ताभ्याम् अधि- उपरि भवति ब्रह्म। "यत् विदितं तदल्पं दुःखात्मकं च इति हेयम्" इति अहेयत्वम् उक्तं ब्रह्मणः। अविदितादधि इत्यत्र अनुपादेयत्वम् उक्तम्। तादृशं ब्रह्म 'आचार्योपदेशपरम्परयैव अधिगन्तव्यं, न तर्कतः प्रवचनमेधाबहुश्रुततपोयज्ञादिभ्यश्च'। "यो हि ज्ञाता स एव सः, सर्वात्मकत्वात्। अतः सर्वात्मनो ज्ञातुः ज्ञात्रन्तराभावात् विदितादन्यत्वम्" अर्थात् ब्रह्मैव ज्ञाता तदन्यः न कोऽपि ज्ञाता। प्ररिभाषाकारेण यत् त्रिविधं चैतन्यं विभागकरणेन प्रदर्शितम्, तत् चैतन्यं ब्रह्मैव इति परिभाषाकारस्य वचनस्य उपष्टम्भकं वाक्यम् एतत्। केनेषितं पतति प्रेषितं मनः" इति मन्त्रेण प्रारभ्यते उपनिषदियम्। सामवेदस्य तवलकार-शाखासम्बद्धा उपनिषदियं तवलंकारोपनिषत् इति नाम्ना च अभिधी अस्यमुपनिषदि चत्वारः खण्डाः सन्ति। अस्याः प्रथमे खण्डे अष्टौ मन्त्राः, द्वितीये खण्डे पञ्चमन्त्र तृतीये खण्डे द्वादशमन्त्राः तथा चतुर्थे खण्डे नवमन्त्राः समुपलभ्या ज्ञातव्यमस्ति यत् अस्याः उपनिषदः आरम्भः 'केन' इति प्रश्नात्मकेन शब्देन भवति, अत एव उपनिषदियं केनोपनिषद् इत्याभिधीयते। अस्यामुपनिषदि तत् पूर्ण ज इमात्मकं वर्तत इति वर्णितम् अस्ति। परमात्मनो बलं विना अग्निः तृणमात्रमपि ज्वालयितुं न शक्नोति। परमात्मनः बलं विना वायुः तृणमपि आदातुं न शक्नोति। व सर्वत्र परमात्मनः शक्तिः अनुसन्धेया मुमुक्षुभिः।

उपनिषत्सु ज्ञानस्वरूपविवेचनम्' इत्येतस्मिन् ग्रन्थे विख्याता दशोपनिषदः एव स्वीकृताः।

**'ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः।**

**ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश।।'**

इत्येवं दशोपनिषदः, तासां भाष्याणि च परामृष्टानि। उपनिषत्सु सर्वत्र ज्ञानशब्दस्य पर्यायेण आत्मा, ब्रह्म इति शब्दद्वयं प्रयुक्तम्। अतः

आत्मस्वरूपम् अथवा ब्रह्मस्वरूपमेव ज्ञानस्वरूपम्, आत्मसाधनोपायाः अथवा ब्रह्मप्रतिपत्त्युपाया एव ज्ञानप्राप्त्युपायाः इति स्पष्टम्।

**सहायकग्रन्थसूची**

**ग्रन्थाः ग्रन्थकर्ता/सम्पादकः/व्याख्याकारः/प्रकाशनसंस्था - समयश्च**

- ईशादि नौ उपनिषद्, (सानुवाद शाङ्करभाष्यसहित), गीताप्रेस, गौरखपुर।
- उपनिशत्सु ज्ञानस्वरूपविवेचनम्, डा.के. अरविन्दराव्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः 2012।
- बृहदारण्यकोपनिषत् भाष्यवार्तिकम्, सुरेश्वराचार्याः - महेष अनुसन्धान संस्थान वाराणसी 1982।
- उपनिषद् दर्शन का रचनात्मक सर्वेक्षण, रामचन्द्रदत्तात्रेय रनाडे, जयपुर – 1977।
- ईशोपनिषद् भाष्य कुसुमाञ्जली (कुसुमाञ्जली नामक हिन्दी व्याख्या), पं. शिवनारायण शास्त्री, परिमल पब्लिकेशन्स, दिल्ली।
- कठोपनिषद् (हिन्दी शाब्दार्थः, अग्रेसी अनुवाद सहित), व्याख्याकर डा. रामरङ्ग शर्मा, भारतीय विद्या प्रकाशन, दिल्ली -1999।
- ईशादि नौ उपनिषद्, (हिन्दी अनुवाद सहित), व्याख्याकार हरिकृष्णदास गोयन्दका, गीताप्रेस, गोरखपुर।
- ईशावास्योपनिषद् (शाङ्करभाष्य, अन्वय, शब्दार्थः तथा विशेष), व्याख्याकार विजय शङ्कर पाण्डेय, मोतीलाल बनारसीदास, दिल्ली -2014।
- केनोपनिषद् (मन्त्र, पदच्छेद, अन्वय, शब्दार्थ, भावार्थ, व्याख्या और अंग्रजी अनुवाद), आहिताग्नि यमुनाप्रसाद त्रिपाठी, मोतीलाल बनारसीदास, दिल्ली।

**सन्दर्भः -**

[1] केनो.उप – 1/2

[2] केनो.उप – 1/3